म् दिव्ये वस्त्रे कुंडले द्वे निर्मिते विश्वकर्मणा दुकूले द्वे ददौ तस्यै निर्मले भक्तिसंयुता अंग
रागं च सीतायै ददौ दिव्यं शुभाननी न त्यजत्यंगशोभां तां शोभने कमलानने पतिव्रते शुभा
इक्त्वा राम समेत्वा हि जानकि कृपालीराघवोप्याता तत्वपासहस्रजनगृहान् भोजयित्वा यथाय
थान्यायेन रामे सीतासमन्वितम् लक्ष्मणं च तदा भामं शुभनरारहकृतांजलिः रामत्वमेव भव
ना नि विधाय तेषां संरक्षणाय सहस्र मानुषाकृतेर्यमाहीन् देहान्विभर्षि न च देहगुणैर्विलिप्तः
त्वत्तो विभेत्यखिलमोहकरी च माया ॥ इति श्रीब्रह्माण्डपुराणे उत्तरखंडे उमामहेश्वरसं
वादे अध्यात्मरामायणे अयोध्याकांडे नवमोऽध्यायः ९ ॥ समाप्तश्चायमयोध्याकांडः ॥

॥ श्री ॥

राम

अयोध्याकांडः पत्र ३२

MSS No. 3036 Subject RELIGION

Name of MSS अध्यात्म रामायण

Author N.G.

Period ____ Folios 37

Script Sanskrit Source Prithi Pal singh

Missing Folios N.A.

1A

303 Gi

क्रूरस्वनास्तिकर्मोणाः शाठ्यशाः परवंचकाः तद्विप्राश्च तथा वैश्याः स्वधर्मत्यागशीलि
नः तद्वच्छूद्राश्च ये केचिद्ब्राह्मणाचाररतत्पराः स्त्रियश्च प्रायशो भ्रष्टा भर्त्रवज्ञाननिर्भ
याः श्वश्रुश्वशुरद्रोहकारिण्यो भविष्यन्ति न संशयः एतेषां नष्टबुद्धीनां परलोकः कथं भ
वेत् इति चिंताकुले चित्ते जायते मम संततम् लघूपायेन येनैषां परलोकगतिर्भवेत्
तमुपायमुपाख्याहि सर्वं वेत्ति यतो भवान् यद्देव्या वाक्यमाकर्ण्य प्रत्युवाच चतुराननः
साधुपृष्टं त्वया साध्वि तत्तच्छृणुष्व समादरम् पुरा विष्णुरहं तारं पार्वतो भक्तवत्सलम् श्री
रामतत्त्वं निजासक्तः पप्रच्छ विनयान्विता श्रियायागिरिशस्तेन मरद्व्याख्यातवान्स्वयम्
पुराणोत्तममध्यात्मरामायणमिति स्मृतम् तत्पार्वती जगद्धात्री शंकराद्यत्नाद्दिवानि
शम् आलोचयति नित्यमानंदमग्ना तिष्ठति सा पवनम् प्रचरिष्यति तल्लोके पुण्यदं पवश्या
यदा तस्माद्यत्नमात्रेण जनानां पापसंहतिम् तावद्विजृंभते पापं बलमहत्याद्यु
स्तरम् यावज्जगति नाध्यात्मरामायणमुदेष्यति तावत्कलिमहोत्साहो निःशंके
संप्रवर्तते तावद्यमभटाः क्रूराः संचरिष्यन्ति निर्भयम् अध्यात्मरामायणस्य की

रा०
२
४

तेनाध्ययनाद्धि तत्फलं वक्तुं न शक्तोस्मि कात्स्न्येन मुनिसत्तम तथापि तस्य माहात्म्यं
वक्ष्ये किंचिन्मयाऽनघ शृणु विघ्नं समाधाय शिवेनोक्तं पुरा मम अध्यात्मरामायण
तश्लोकं श्लोकार्धमेव च यः पठेद्भक्तिसंयुक्तः स पापान्मुच्यते तत्क्षणात् यस्तु प्रत्यहं
मध्यात्मरामायणमनन्यधीः यथाशक्ति पठेन्नाम स जीवन्मुक्त उच्यते यो भक्त्यार्च
यते ध्यात्मरामायणमतंद्रितः दिने दिने श्वमेधस्य फलं तस्य भवेन्मुने यदृच्छया
पि यो ध्यात्मरामायणमहर्न्नितः सर्वदेवार्चनफलं संप्राप्नोति न संशयः लिखित्वा
पुस्तकाध्यात्मरामायणमशेषतः यो ददाति रामभक्तेभ्यस्तस्य पुण्यफलं शृणु ।
अधीतेषु च वेदेषु शास्त्रेष्वाख्यातेषु च यत्फलं तु लभेल्लोके तत्फलं तस्य संभवेत् य
कादश्यां दिने ध्यात्मरामायणमुपोषितः यो रामभक्तसंदासे व्याकरोति नरोत्तमः
तस्य पुण्यफलं वक्ष्ये शृणु वै मुनिसत्तम प्रत्यक्षरं तु गायत्रीपुरश्चर्याफलं भवेत् उपवा
सव्रतं कृत्वा श्रीरामनवमीदिने रात्रौ जागरितो ध्यात्मरामायणमनन्यधीः यः प
ठेच्छृणुयाद्वापि तस्य पुण्यं वदाम्यहम् कुरुक्षेत्रादिनिखिलपुण्यतीर्थेष्वनेकशः

रा
२

2A

शान्तस्तल्पयनं सूर्यग्रहणे सर्वतोमुखे विप्रेभ्यो आसमुद्रेभ्यो दत्वा यत्फलमश्नुते
तत्फलं संभवेन्नूनं सत्यं सत्यं न संशयः यो गायति तथाध्यात्मरामायणमहर्निशम्
श्रान्तस्य पठतो ह्यन्ते देवा इन्द्रादयः स्मृताः पठेत्स्वयं स्वयमध्यात्मरामायणमनुव्रतः यद्य
त्करोति सत्कर्म तत्तत्कोटिगुणं भवेत् तत्र श्रीरामहृदयं यः पठेत्सुसमाहितः सब्र
ह्मघ्नोपि पूतात्मा त्रिभिरेव दिनैर्भवेत् श्रीरामहृदयं यस्तु हनुमत्प्रतिमान्तिके त्रिप
ठेन्नित्यमहो मौनी स सर्वेप्सितभाग्भवेत् पठेच्छ्रीरामहृदयं तुलस्यश्वत्थयोर्यदि प्रत्य
हं प्रकुर्वीत ब्रह्महत्या निवर्तते श्रीरामगीतामाहात्म्यं कृत्स्नं जानाति शंकरः तदर्धं
गिरिजा वेत्ति तदर्धं वेद्म्यहं मुने दत्वैकं विश्ववन्द्यस्य कृत्स्नं वक्तुं न शक्यते यज्ज्ञात्वा
तत्क्षणाल्लोकाः शुद्धचित्तमवाप्नुयात् श्रीरामगीता पापं न नाशयति नारद न
च यच्छ्रयामहं लोके मार्गमाणोपि सर्वदा रामणीयनिषत्सिंधुमस्याध्यात्मानुदितां सदा
लक्ष्मणप्रार्थितां गीतां सुधां पीत्वाऽमरो भवेत् जमदग्निसुतः श्रुत्वा कार्तवीर्यवधेच्छया
धनुर्विद्यामभ्यसितुं महेशस्यान्तिके गतः अधीयन्नारतात्पार्श्वे श्रीरामगीतां श्रयन्नतः श्री

रा.

१

3

न्नागरहीत्वा स्वपठन्नारायणकलामगात् ब्रह्महत्यादिपापानां निःकृतिं यदि वांछति
रामगीतां मासमेकं पठित्वा मुच्यते नरः दुःप्रतिग्रहदुर्भोज्यदुरालापादिसंभवं पा
पं संकीर्तनेनैव रामगीता विनाशयेत् सालिग्रामशिलाग्रे च तुलस्यश्वत्थसंनिधौ
यतीनां पुरतस्तद्वद्रामगीतां पठेन्नरः तत्फलमवाप्नोति यद्वाचोपि न गोचरम्
रामगीतां पठन्भक्त्या श्राद्धे संभोजयेद्द्विजान् तस्य ते पितरः सर्वे यांति विष्णोः परं पदम्
एकादश्यां निराहारो नियतो द्वादशीदिने स्थित्वागस्त्यतरोर्मूले रामगीतां पठेन्नरः
स एव राघवः साक्षात्सर्वदेवैश्च पूज्यते विना ध्यानं विना दानं विना तीर्थावगाहनात्
रामगीतां नरोधीत्य तदंते तत्फलं लभेत् बहुनात्र किमुक्तेन शृणु नारद तत्वतः
श्रुतिस्मृतिपुराणेतिहासागमशतानि च अर्हंति नाल्पमध्यात्मरामायणकला
मपि ॥ अध्यात्मरामचरितस्य मुनीश्वराय माहात्म्यमेतदुदितं कमलासनेन यः
श्रद्धया पठति वा शृणुयात्स मर्त्यः प्राप्नोति विष्णुपदवीं सुरवंद्यमानः ॥ इति श्री
ब्रह्मांडपुराणे उत्तरखंडे एकषष्टितमोध्यायः १ ॥ यः पृथ्वीभरवारणाय दिवि

राम

१

3A

तैः संप्रार्थितः विस्मयः स जातः पृथिवीतले रविकुले मायामनुष्योऽव्ययः निःशंकं ह
त्वा दशाननं पुनरगात् ब्रह्मत्वमाद्यं स्थिरां कीर्तिं पापहरां विधाय जगतां तं जानकेशं भ
जे विष्णोर्ध्रुवस्थितिलयानादिहेतुमेकं मायाश्रयं विगतमायमचिंत्यमूर्तिम् आनंद
सांद्रममलं निजबोधरूपं सीतापतिं विदिततत्वमहं नमामि पठंति ये नित्यमनन्य
चेतसा शृण्वंति वाध्यात्मिकसंज्ञितं शुभम् रामायणं सर्वपुराणसम्मितं निर्हतपा
पा हरिमेव यांति ते अध्यात्मरामायणमेव नित्यं पठेद्यदीच्छेद्भवबंधमुक्तिम् गवां
सहस्रायुतकोटिदानैः फलं लभेद्यः शृणुयात्सनित्यं पुरारिगिरिसंभूता श्रीरामार्ण
वसंश्रिता अध्यात्मरामगंगेयं पुनाति भुवनत्रयम् कैलासाग्रे कदाचिद्रविशतवि
मले मंदिरे रत्नपीठे संविष्टं ध्याननिष्ठं त्रिनयनमभयं सेवितं सिद्धसंघैः देवी वा
मांकसंस्था गिरिवरतनया पार्वती भक्तिनम्रा प्राहेदं देवमीशं सकलाहतकरं वाक्य
मानंदकंपम् ॥ श्रीपार्वत्युवाच ॥ नमोस्तु ते देव जगन्निवास सर्वात्मदृक् त्वं परमेश्वरो
सि पृच्छामि तत्वं पुरुषोत्तमस्य सनातनं त्वाच सनातनोसि गोप्यं यदत्यंतमनन्यवा

रा० अ० ५

च्यं वदंति भक्तेषु महानुभावाः तदप्यहोऽहं तव देव भक्ता प्रियोऽसि मे त्वं वद यत्तु पृष्टम्
ज्ञानं सविज्ञानमथानुभक्तिवैराग्ययुक्तं च मितं विभास्वत् जानाम्यहं योषिदपि त्वदुक्तं
यथा तथा ब्रूहि तरंति येन पृच्छामि चान्यच्च परं रहस्यं तदेव चाग्रे वद वारिजाक्ष श्री
रामचंद्रेऽखिललोकसारे भक्तिर्दृढा नौर्भवति प्रसिद्धा भक्तिः प्रसिद्धा भवमोक्षणाय ना
न्यत्ततः साधनमस्ति किंचित् तथापि हृत्संशयबंधनं मे विभेत्तुमर्हस्यमलोक्तिभिस्त्वं ।
त्वं वदंति रामं परमेकमाद्यं निरस्तमायागुणसंप्रवाहं भजंति चाहर्निशमप्रमत्ता
परं पदं यांति तथैव सिद्धाः वदंति केचित्परमोऽपि रामः स्वाविद्यया संवृतमात्मसंज्ञ
म् जानाति नात्मानमतः परेण संबोधितो वेद परात्मतत्त्वम् यदि स्म जानाति कुतो वि
लापः सीताकृतेऽनेन कृतः परेण जानाति नैवं यदि केन सेव्यः समः स सर्वैरपि जीवजा
तैः अत्रोत्तरं किं विदितं भवद्भिस्तद्ब्रूहि मे संशयभेदवाक्यम् ॥ श्रीमहादेव उवाच ॥
धन्यासि भक्तासि परात्मनस्त्वं यज्ज्ञातुमिच्छा तव राम तत्त्वं पुरा न केनाप्यभिचोदितोऽहं ।
वक्तुं रहस्यं परमं निगूढम् त्वयाद्य भक्त्या परिचोदितोऽहं वक्ष्ये नमस्कृत्य रघूत्तमं ते रामः

राम ५

परात्मा प्रकृतेरनादिरानंद एकः पुरुषोत्तमो हि स्वमायया कृत्स्नमिदं हि सृष्ट्वा नभो।
वदंतर्बहिरास्थितो यः सर्वांतरस्थोपि निगूढ आत्मा स्वमायया सृष्टमिदं विचष्टे जग
ंति नित्यं परितो भ्रमंति यत्संनिधौ चुंबकलोहवद्धि एतन्न जानंति विमूढचित्ताः स्वावि
द्यया संवृतमानसा ये स्वाज्ञानमप्यात्मनि शुद्धबुद्धे स्वारोपयंतीह निरस्तमाये संसार
मेवानुसरंति ये वै पुत्रादिसक्ताः पुरुकर्मयुक्ताः जानंति नैवं हृदये स्थितं वै चामीकरं
कंठगतं यथाज्ञाः यथा प्रकाशो न तु विद्यते रवौ ज्योतिःस्वभावे परमेश्वरे तथा वि
शुद्धविज्ञानघने रघूत्तमेऽविद्या कथं स्यात्परतः परात्मनि यथा हि चाक्ष्णा भ्रमता गृहा
दिकं विनष्टदृष्टेर्भ्रमतीव दृश्यते तथैव देहेंद्रियकर्तुरात्मनः कृते परेध्यस्य जनो।
विमुह्यति नाहो न रात्रिः सवितुर्यथा भवेत्प्रकाशरूपाव्यभिचारतः क्वचित् ज्ञानं तथा
ज्ञानमिदं द्वयं हरौ रामे कथं स्थास्यति शुद्धचिद्घने तस्मात्परानंदमये रघूत्तमे विज्ञान।
रूपे न हि विद्यते तमः अज्ञानसाक्षिण्यरविंदलोचने मायाश्रयत्वान्न हि मोहकारणं
अथ ते कथयिष्यामि रहस्यमपि दुर्लभम् सीतारामामरुत्सूनुसंवादं मोक्षसाधनम्

अ॰ रा॰ बा॰ ५ पुरारामायणेरामोरावणंदेवकंटकम् हत्वारणेरणश्लाघ्यंसपुत्रबलवाहनम्
सीतयासहसुग्रीवलक्ष्मणाभ्यांसमन्वितः अयोध्यामगमद्रामोहनूमत्प्रमुखैर्वृ-
तः अभिषिक्तःपरिवृतोवसिष्ठाद्यैर्महात्मभिः सिंहासनेसमासीनःकोटिसूर्य-
समप्रभः दृष्ट्वातदाहनूमंतंप्रांजलिंपुरतःस्थितम् कृतकार्यंनिराकांक्षंज्ञाना-
5 पेक्षंमहामतिम् रामःसीतामुवाचेदंब्रूहितत्वंहनूमते निष्कल्मषोऽयंज्ञानस्य
पात्रंनोनित्यभक्तिमान् तथेतिजानकीप्राहतत्वंरामस्यनिश्चितम् हनूमतेप्रप-
न्नायसीतालोकविमोहिनी ॥ सीता ॥ रामंविद्धिपरंब्रह्मसच्चिदानंदमद्वयम्
सर्वोपाधिविनिर्मुक्तंसत्तामात्रमगोचरम् आनंदंनिर्मलंशांतंनिर्विकारंनिरंजनं
सर्वव्यापिनमात्मानंस्वप्रकाशमकल्मषम् तस्यसंनिधिमात्रेणसृजामीदम-
तंद्रिता तत्सान्निध्यान्मयासृष्टंतस्मिन्नारोप्यतेऽबुधैः अयोध्यानगरेजन्मरघुवंशे-
ऽतिनिर्मले विश्वामित्रसहायत्वंमखसंरक्षणंततः अहल्याशापशमनंचापभंगो राम
महेशितुः मत्पाणिग्रहणंपश्चाद्भार्गवस्यमदक्षयः अयोध्यानगरेवासोमया ५

त्वमेवं राज्ञि वरद्वयमपि त्वयोक्तो वरदो राजन्मादिदं मे वरद्वयम् त्वयैवानिशन्तु विरं स्यास भूतं।
मयानव यदा मे वसरोभूया महादेहि वरद्वयम् तथेत्युक्त्वा ययौ राजा मंदिरं तव सवृते त्व
दःखं ते मया सर्वमिदानीं स्मृतिमागतम् अतः शीघ्रं प्रविश्य यत्कोपागारे कृत्वाल्विता
विमुच्य सर्वाभरणं सर्वतो विनिकीर्य च भूमौ वे शयाना वैन्तृत्सीमा गते भामिनि त्वं या
वत्सत्य प्रत्युत्तस्य राजा भीष्यक रोति ते श्रुत्वा त्रिजकपो के तद्वदा के कयनेति नी तस्या
मेवाखिले मनेडः संज्ञाखिन्नविभ्रमः नामाह कैकेयी हा कृत तैलं हिरीह शी एवं
त्वा गुहि मयदत्रान तान्तेव वक्र संदरी भरतो यदि राजा मे भविष्यति हलः प्रियः प्राप्स्यान्सा
ते प्रदास्यामि मम त्वं प्राणवल्लभा इत्युक्त्वा कोपभवने प्रविश्य महर्षा रुषा विमुच्य स
र्वाभरणं विनिकीर्य समं ततः भूमौ शयाना सहसा मलिनां वर धारिणी प्रोवाच स्वगृणमे
कुब्जे यावद्रामं वनं व्रजेत् प्राणांस्त्यक्ष्ये वा केशं पिधेना वदेव हि निश्चयं कुरु कल्या
णि कल्याणं ते भविष्यति इत्युक्त्वा गता कुब्जा गृहं स्वा पितथाकरोत् धीरा संतप्ता।
त्विनो बहुगणाचारा त्वियोवा यथा नीतिज्ञा विधिवादकदेशोकपरो वीरा विकोत।

रा॰
अ॰ यो॰
६
6

णा इष्टानामतिमोदभवेनापियांसंतः सराचेद्वे ब्रह्मुद्यापरिभाविलोत्रजनातितत्सा
मंक्रमेणसमृतम् ॥ श्रीयोध्याकांडेद्वितीयोध्यायः ॥ महादेवः ॥ ततोराजादशर
थोरामाभ्युदयकारणात् स्वादिश्यमंत्रिप्रकृतीः सानंदोगृहमाविशत् तत्रादृष्ट्वा
प्रियांराजाकिमेतदितिविह्वलः यापुरामंदिरंतस्याः प्रविष्टेमयिशोभना हसंतीमा
मुपयातिसाकिंनैवाद्यदृश्यते इत्यात्मन्येवसंचिंत्यमनसातिविदूयता पप्रच्छदा
सीनिकरंकैकेयीवः स्वामिनीशुभा नोयातिमेयथापूर्वंमत्प्रियाप्रियदर्शना ताऊ
चुः क्रोधभवनेप्रविष्टानैवविद्महे कारणंदेवतत्रैवगत्वानिश्चेतुमर्हसि इत्युक्तोभ
यसंत्रस्तोराजातस्याः समीपगः उपविश्यशनैर्देहंविस्पृशन्पाणिनाब्रवीत् किं
शेषेवसुधापृष्ठेपर्यंकादीन्विहायच मांत्वंखेदयसेभीरुयतोमांनाभिभाषसे अ
लंकारंपरित्यज्यभूमौमलिनवाससी किमर्थंब्रूहिसकलंविधास्येतववांछितम्
कोवातवाहितंकर्तानारीवापुरुषोपिवा समेदंड्यश्चवध्यश्चभविष्यतिनसंशयः ब्रू
हिदेवियथाप्रीतिस्तववश्यंममाग्रतः तदिदानींसाधयिष्येसुदुर्लभमपितत्क्षणात् ना

राम
६

6A

यस्मात्स्यात्तु गृहीतास्मिन्कृतार्थोऽस्मि जगत्प्रभो विच्छिन्नो मे निर्मूलं देहगेहे भवद्वनुग्रहात्
वक्तव्यो ब्रह्मलिंगे रामस्तत्वामृतरसायनम् पिबंत्या मे मनो देवनेत्रं पत्यालेभवाय च श्रीराम
स्य कथा नन्दनं श्रुतं मे तेनैव मया इदानीं श्रोतुमिच्छामि विस्तरेणास्फुटान्तरम् ॥ श्रीमा
हादेवः ॥ शृणु देवि प्रवक्ष्यामि गुह्याद्गुह्यतरं महत् अध्यात्मरामचरितं रामेण कथितं पुरा
म नरः पठेत्कथयिष्यामि शृणु पापनिवारणम् यच्छ्रुत्वा मुच्यते जंतुर्ब्रह्महत्यादि महाभया
त् साक्षात्तेपरमात्मा हि हिंदीवांघ्रः पुत्रसंततिः भूमिर्भारेण भग्नादृश्या वदन्त्ययो शोवरदो
गणानां श्रुत्वा गोरूपमाहोदीरि विजमनिजनैः [illegible] गत्वा लोकेऽहं देवीव्यसन
नयनतावलणे साहस्रवैश्रमा ध्यानान्मुहूर्तं सकलमपि हृदा वेदशेषात्मकत्वात् तस्मा
त्तीरसमुद्रतीरस्[illegible] पद्मस्वात्पद्वैर्दंतो देव्या चाखिललोकरक्षामजरं सर्वतमीशं हरिं
यस्तो [illegible] भिर्मुद्रितोर्मलपदैस्तोत्रैः पुराणोद्भवैः भक्त्यागाङ्ग्दयागीराञ्निविमलेनानं
दवाष्पैर्हृतः ततः स्फुरत्सहस्रांशुसहस्रसदृशप्रभः प्रादुरासीद्यथा प्राच्यां दिशि वा
विरुद्धामः कथंचिद्दृष्टवान्ब्रह्मा दुर्दर्शमकृतात्मनाम् इंद्रनीलप्रतीकाशं स्मितास्यपं

रा॰ सुलोचनम् किरीटहारकेयूरकुंडलैः कटकांगुलिम् विभ्राजमानं श्रीवत्सकौस्तुभभूषा
प्र॰ भूषान्वितम् स्वर्वांद्धैः सनकाद्यैस्सपार्षदैः परिवेष्टितम् स्वर्णयज्ञोपवीतेन स्वर्णवर्णे।
१ नवेणव श्रियाख्यया च सहितेन गरुडोपरि संस्थितम् हर्षगद्गदया वाचा स्तोत्रेण संस्तुपा
7 चक्रमे प्रभुः ॥ नमोस्मि ते महादेव प्राणबुद्धींद्रियात्मभिः यस्मिंस्त्वनेकसंपाशाङ्कुर
निवेशं समस्तभिः मायया गुणमय्या वेसर्जस्यवसिलेपसि जगद्येन न तेन त्वमात्मना
नुभवात्मनः नष्टाप्नुद्धिर्न दृष्टानो हानाध्ययनकर्मभिः शुद्धात्मनो न यशसि सदा भक्ति
मतो यथा स्वतस्त्वदंघ्रिमहेहविस्तरोवापदम्बये सयोगिनर्हृदये नित्यं सन्निमिः सात्वतै
र्ध्येयम् ब्रह्माद्यैः स्वार्थसिध्यर्थं सस्मामिः शर्वसेवितम् अपरोतान्नुभावितस्त्वं ताविभिर्यो
हिभावितः नमोस्थिश्रमानिर्मोल्पफलसीमालयाविभो सार्थतेवस्याप्तिपदेलश्रापिश्रीः
सतास्तवत् स्वतस्तत्पादभक्तेष्युतवभक्तिः ययोधिका भक्तिरेवाभिवांछिता तेन तस्मात्स्वा
देवदिनः स्वतस्त्वत्पादकमले भक्तिरेव सदास्तु मे संसारभयतप्तानां भेषजं भक्तिरेव ते राम
इति स्तुवाणं वल्लाणवभाषे भगवान्हरिः किंकरोमीति ते वेधाः प्रभुवाचातिहर्षितः १

7A

भगवान्रावणोनामपौलस्त्यतनयोमहान् प्राप्तसानामपीपातिर्मद्दत्तवरदर्पितः त्रिलो
कींलोकपालांश्चबाधतेविश्वबाधकः मानुषेणमृतिस्तस्यमयाकल्याणकल्पिता अ
तस्त्वमानुषोभूत्वाजहिदेवरिपुंप्रभो ॥ श्रीभगवानुवाच ॥ कश्यपस्यवरोदत्तस्तपसा
तोषितेनमे याचितःपुत्रभावायतथेत्यंगीकृतंमया सइदानींदशरथोभूत्वातिष्ठति
भूतले तस्याहंपुत्रतामेत्यकौसल्यायांशुभेदिने चतुर्धात्मानमेवाहंसृजामीतरयोः
पृथक् इत्युक्त्वांतर्दधेविष्णुर्ब्रह्मादेवानथाब्रवीत् विष्णुर्मानुषरूपेणभविष्यतिरघोः
कुले यूयंसृजध्वंसर्वेपिवानरेष्वंशसंभवाः विष्णोःसहाय्यंकुरुतयावत्स्थास्यतिभू
तले इतिदेवान्समादिश्यसमाश्वास्यचमेदिनीम् ययौब्रह्मास्वभवनंविज्वरःसुखमा
स्थितः देवाश्चसर्वेहरिरूपधारिणःस्थिताःसहायार्थमितस्ततोहरेः महाबलाःपर्वतवृ
क्षयोधिनःप्रतीक्षमाणाभगवंतमीश्वरम् ॥ अयोध्याकांडेद्वितीयोध्यायः ॥ २ ॥ महा
देवः ॥ कदाचित्कौशिकोभ्यागादयोध्यांज्वलनप्रभः द्रष्टुंराममपरात्मानंजातंज्ञात्वास्व
मायया दृष्ट्वादशरथोराजाप्रत्युत्थायाविरेणत वशिष्ठेनसमागम्यपूजयित्वायथावि

रा॰ सं॰ ८ 8

श्रीरामाय नमः ॐ अथराजादशरथः श्रीमान्सत्यपराक्रमः अयोध्याधिपतिर्वीरः सर्व
लोकेषु विश्रुतः अनपत्यत्वदुःखेन पीडितो गुरुमेकदा वसिष्ठं मुनिशार्दूलमभिवा
द्येदमब्रवीत् स्वामिन्पुत्राः कथं मे स्युः सर्वलक्षणलक्षिताः पुत्रहीनस्य मे राज्यं सर्वं दुः
खाय कल्पते ततोऽब्रवीद्वसिष्ठस्तं भविष्यन्ति सुतास्तव चत्वारः सत्वसंपन्ना लोकपाल
इवापरे शान्ताभर्तारमानीय ऋष्यशृङ्गं तपोधनम् त्वत्वादेवगीतानि जयद्याम्यादि
प्रार्थिताम् आसां कीर्तनको वश्यमृष्यशृङ्गोऽमहीमतः अस्माभिः सहितः पुत्रकामे
ष्टिं प्रीत्या समाचर तथेति मुनिमानीय मन्त्रिभिः सहितः स्वयं यज्ञकर्म समारेभे मुनि
र्विवीतकल्मषैः अहूयात्स्यमानेऽग्नौ तद्भुतादनलः प्रभः पायसपूर्णपात्रहस्त गृहीत्वो
वाच दशरथं गृहाण पायसं दिव्यं पुत्रार्थं देवनिर्मितम् लप्स्यसे परमात्मानं पुत्रत्वेन
न संशयः इत्युक्त्वा पायसं दत्वा तस्मै अन्तर्दधेऽनलः एवं देवमुनिशार्दूलौ राजा महातो
रथः वासिष्ठ ऋष्यशृङ्गाभ्यामनुज्ञातो ददौ हविः कौसल्यायै च कैकेय्यै अर्धमर्धं प्रय
त्नतः ततः सुमित्रा संप्राप्ता जगृहुः पार्थिकं चरुम् कौसल्या तु स्वभागार्धं ददौ तस्यै मु

राम ८

8A

दान्विता कैकेयीचस्वभागार्धं ददौ प्रीतिसमन्विता ३ ततश्च ताः सर्वाः स्त्रियो गर्भसमन्वि
ताः देवता इव ता रेजुः स्वभासा राजमंदिरे दशमे मासि कौसल्या सुषुवे पुत्रमद्भुतम्
मधुमासे सिते पक्षे नवम्यां कर्कटे शुभे पुनर्वस्वृक्षसहिते उच्चस्थे ग्रहपंचके मेषं पू
षणि संप्राप्ते पुष्पवृष्टिसमाकुले आविरासीज्जगन्नाथः परमात्मा सनातनः नीलोत्पल
दलश्यामः पीतवासाश्चतुर्भुजः जलजारुणनेत्रांतः स्फुरत्कुंडलमंडितः सहस्रार्क
प्रतीकाशः किरीटी कुंचितालकः शंखचक्रगदापद्मवनमालाविराजितः अनुग्रहा
ख्यहृत्स्थेन्दुसच्चकास्मितचंद्रिकः करुणारससंपूर्णविशालोत्पललोचनः श्रीवत्स
हारकेयूरनूपुरादिविभूषितः दृष्ट्वा तं परमात्मानं कौसल्या विस्मयाकुला हर्षाश्रु
पूर्णनयना नत्वा प्रांजलिरब्रवीत् ॥ कौसल्या ॥ देवदेव नमस्तेस्तु शंखचक्रगदाधर
परमात्माच्युतोऽनंतः पूर्णस्त्वं पुरुषोत्तमः वदंत्यगोचरं वाचां बुद्ध्यादीनामतींद्रियम् १
त्वां वेदवादिनः सत्तामात्रैकज्ञानविग्रहम् त्वमेव मायया विश्वं सृजस्यवसि हंसि च
सत्वादिगुणसंयुक्तस्तनुपवामलः सदा करोषीव न कर्ता त्वं गच्छसीव न गच्छसि शृ

बा. अ. ५ णोषिनशृणोषीवपश्यसीवनपश्यसि अप्राणोह्यमनाःशुद्धइत्यादिश्रुतिरब्रवीत् स
मःसर्वेषुभूतेषुतिष्ठन्नपिनलक्ष्यसे अज्ञानध्वांतचित्तानांव्यक्तएवसुमेधसाम् जठरेत
वदृश्यंतेब्रह्मांडाःपरमाणवः त्वंममोदरसंभूतइतिलोकान्विडंबसे भक्तेषुपारवश्यंते
दृष्टंमेऽद्यरघूत्तम संसारसागरेमग्नापतिपुत्रधनादिषु भ्रमामिमाययातेऽद्यपादमूलमुपा
गता देवत्वद्रूपमेतन्मेसदातिष्ठतुमानसे आवृणोतुनमांमायातवविश्वविमोहिनी
उपसंहरविश्वात्मन्नदोरूपमलौकिकम् दर्शयस्वमहानंदबालभावंसुकोमलम् ला
लितालिंगनालापैस्तरिष्याम्युत्कटंतमः ॥ श्रीभगवानुवाच ॥ यद्यदिष्टंतवास्त्यंबतत्तद्भ
वतुनान्यथा अहंहिब्रह्मणापूर्वंभूमिभारापनुत्तये प्रार्थितोरावणंहंतुंमानुषत्वमुपा
गतः त्वयादशरथेनाहंतपसाराधितःपुरा मत्पुत्रत्वाभिकांक्षिण्यातथाकृतमभूत्त्विते
रूपमेतत्त्वयादृष्टंप्राक्तनंतपसःफलम् मद्दर्शनंविमोक्षायकल्प्यतेन्यत्तुदुर्लभम् संवाद
मावयोर्यस्तुपठेद्वाशृणुयादपि सयातिममसारूप्यंमरणेमत्स्मृतिंलभेत् इत्युक्त्वामात
रंरामोबालोभूत्वारुरोदह बालोऽपींद्रनीलाभोविशालाक्षोऽतिसुंदरः बालारुणप्रती

9

राम ५

9A

कायोलालिताखिललोकपः अथराजादशरथः कृत्वाषष्ठेऽह्निचोत्सवम् स्नानंदानंवि
मघोस्नावाप्ययोगुरुणासह रामेतिजीवपञ्चांतेदृष्ट्वाहर्षोत्कर्षयुतः गुरुणाजातकर्मा
णिकर्तव्यानिचकारसः कैकेयीचाप्यभरतमसूतकमलेक्षणम् सुमित्रायामिमौजातौ
शौरीईसहशाननौ तदाग्रामसहस्राणिब्राह्मणेभ्योददौमुदा सुवर्णानिवस्त्राणिवासां
सिस्त्रभीःशुभाः यस्मिन्रमंतेमुनयोविद्ययाज्ञानसंप्लवे तंगुरुःप्राहरामेतिरमणाद्रा
मइत्यपि भरणाद्भरतोनामलक्ष्मणोलक्षणान्वितः शत्रुघ्नंशत्रुहंतारमेवंगुरुरभाषत
लक्ष्मणोरामचंद्रेणशत्रुघ्नोभरतेनच द्वंद्वीभूयचरतौतौपयसाद्यानुसारतः रामस्तुल
क्ष्मणेनाथविचरन्बाललीलया रमयामासपितरौचेष्टितैर्मृदुभाषितैः भालेस्वर्णमया
श्वत्थपर्णमुक्ताफलप्रभम् कंठेरत्नमणिव्रातमध्येद्वीपनखांकितम् कर्णयोःस्वर्णसं
पत्ररत्नार्जुनसुनालकम् शिंजानमणिमंजीरकटिसूत्रांगदैर्वृतम् स्मितवक्त्राल्पदशनं
मिंद्रनीलमणिप्रभम् अंगणेरममाणंतंवालकानेवसर्वतः दृष्ट्वादशरथोराजाकौसल्या
समुदेतदा भोक्ष्यमाणेदशरथोरामेतीतिचासकृत् आहूयमानोहर्षेणनायाति

रा॰
अ॰
१०
10

लीलया स्थापयति च को मल्पाग्राहसमसस्मिन्नामतुलम् यावन्नापि न शक्नोति स्प्रष्टुं योगि
ग्मनैरगतिम् ब्रह्मस्वरूपमायाति कंदर्मां किं न पाणिना किंचिद्भूरीबालकवल्लेषु नरेवप
लायते एवमानंदसंदोहो जगदानंदकारकः मायाबालवपुर्धृत्वा रमयामास दंपती
शुच्यकालेन ते सर्वे कौमारं प्रतिपेदिरे उपनीतो वसिष्ठेन सर्वविद्याविशारदः धनुर्वेदे
च निरताः सर्वशास्त्रार्थवेदिनः बभूवुर्जगतो नाथा लीलया नररूपिणः लक्ष्मणस्तु स॰
दा राममनुगच्छति साधवम् सेवते सेवकभावेन शत्रुघ्नो भरतं तथा रामश्चापधरो नित्यं तू
णीबाणान्वितः प्रभुः अश्वारूढो वनं याति मृगयायां सलक्ष्मणः हत्वा दुष्टमृगान्सर्वे
पित्रे सर्वं न्यवेदयेत् प्रातरुत्थाय स्नात्वा पितरावभिवाद्य च पौरकार्याणि सर्वा॰
णि करोति विनयान्वितः बंधुभिः सहितो नित्यं भुक्त्वा मुनिभिरन्वहम् धर्मशास्त्ररह
स्यानि शृणोत्यपि करोति च एवं परात्मा मनुजावतारो मनुष्यलोकाननुसृत्य सर्वम्
चक्रे विकारीपरिणामहीनो विचार्यमाणो न करोति किंचित् ॥ इति श्रीमदध्यात्मरामा॰
यणे तृतीयोध्यायः ३ ॥ महादेवः ॥ कदाचित्कौशिकोऽभ्यागादयोध्यां ज्वलनप्रभः द्र

राम
१०

10A

ष्टुं रामं परमात्मानं ज्ञात्वेसातास्म भूपया इक्ष्वाद शरथो राजा शत्रुघ्नायापि वैरिणा वसिष्ठेन
समाज्ञप्यसृजयिन्नायथायथाविधि शत्रुघ्नायाप्य निर्गत्प्रांजलिर्भक्तिनम्रधीः रुदता
स्मिन्वनोद्दिष्टे तदा रामनकाननम् लक्ष्मीः पद्मपद्मयातितद्वैवायातेसंपदः यद्दृष्टे माणवो
स्मिन्नेच्छुर्हि सत्यकरोमितनत् विश्वामित्रोपि निर्भीत्या शत्रुवाच महामतिः पुष्पवृष्टिश्च
समभूमे हेतुपाय श्रुतरामिन्तन् यदा रेभेततदा हित्वा विच्छेदकृतं वै तानि नित्यशः मारीचसुबा
हुप्रभृतीचान्वुच राक्षसाः श्रमसलयोर्वधार्थाय प्रेरितमेकपञ्चमे लक्ष्मणेन सह श्रीरा
न वनं याभविष्यति वसिष्ठेन महामम्यदीयलांयदेशोचते पञ्चगुरुमेकांतेराजा
विज्ञापयायणः किंकरोमि गुरो राम सत्यकेनोन्म हतमनः वनं बहुसहस्राणि केहेनोन्या
हि तानःस्थिताः चक्रवर्ती भरतस्तस्य तत्र रामोऽपि वल्लभः रामो यदा गच्छति चेत्तज्जीवामि
कथंचन प्रभात्यतो यदि मनि शापेदा सत्यमेशापम् कथं श्रेयो भवेन्मम सत्येना
न मांस्पृशेत् ॥ वसिष्ठः ॥ शृणु राजन्देवगुह्यं गोपनीयं प्रयत्नतः रामो न मानुषो जातः
परमात्मा सनातनः भूमेर्भारावतार्याय ब्रह्मणा प्रार्थितः पुरा स एव जातो भगवान्को

रा॰ सुल्यायोनवानघ तेनप्रजापतिःपूर्वैकश्यपोब्रह्मणःसुतः कौसल्यावादितिर्देवमाता
स्रं॰ पूर्वंयशस्विनी भवंतौतपश्चैवतेपातेबहुविस्तरं सुग्राम्यविषयोविस्मृश्नाध्यानेकतत्प
॥ रौ तदाप्रसन्नोभगवान्वरदोभक्तवत्सलः वृणीष्ववरमित्युक्तेत्वंमेपुत्रोभवामल इति
।। त्वयायाचितोसौभगवान्भक्तभावनः तथेत्युक्त्वायपुत्रस्तेजातोरामःसएवसः शेषस्तु
लक्ष्मणोराजन्नाममेवान्वपद्यत जातौभरतशत्रुघ्नौशंखचक्रौरघावपौ योत्वंचकाश्य
तारेणत्वयारामसवत्सलौ योगमायात्मसीतेतिजाताजनकनंदिनी विश्वामित्रोपिवा
मस्यसंयोजयितुमागतः एतद्गुह्यतमंराजन्नवक्तव्यंकदाचन अतःप्रीतेनमनसा
सत्कृत्याथकौशिकम् प्रेषयस्वरमानाथंरामंचसहलक्ष्मणं वसिष्ठेनैवमुक्तस्तु रा
जादशरथस्तदा कृतकृत्यमिवात्मानंमेनेप्रहृष्टतोनरः आहूयरामरामेतिलक्ष्मणे
तिचसादरम् वालिंग्यमूर्ध्न्यवघ्रायकौशिकायसमर्पयेत् ततोहृष्टोथभगवान्वि
श्वामित्रःप्रतापवान् आशीर्भिरभिनंद्याथराजानंरामलक्ष्मणौ रक्षीमाचापतूणीवा राम
णाणबद्धधरोयधौ कौचिद्देशमतिक्रम्यरामसाहूयभक्तितः दृष्टौवलौचातिवलौवि ॥

11A

ये द्वे देवनिर्मिते तयोर्ग्रहणमात्रेण क्षुत्क्लेशादिर्न जायते ततोऽप्युत्तीर्णगंगास्ते ताटकावना
गताः विश्वामित्रस्तदा प्राह रामं सत्यपराक्रमम् अत्रास्ति ताटका नाम राक्षसी कामरू
पिणी बाधते लोकमखिलं जहि तामविचारयन् तथेति धनुरादाय सगुणं रघुनंदनः
टंकारमकरोत्तेन शब्देनापूरयत्वनम् तच्छ्रुत्वासहमाना दा ताटका घोररूपिणी क्रोधसं
मूर्छिता राममभिदुद्राव मेघवत् तामेकेन शरेणाशु ताडयामास वक्षसि पपात विपि
ने घोरं वमन्ती रुधिरं बहु ततोऽतिसुंदरी यक्षी सर्वाभरणभूषिता शापान्निशाचरत्वाम
मुक्ता रामप्रसादतः नत्वा रामं परिक्रम्य गता रामाज्ञया दिवम् ततोऽतिहृष्टः परिरभ्य रा
मं मूर्ध्न्येनमाघ्राय विचिन्त्य किंचित् सर्वास्त्रजालं बहुमंत्रयुक्तं प्रीत्यैव रामाय ददौ प्रहृष्टः ।
इति श्रीरामायणे बालकांडे चतुर्थोऽध्यायः ४ महादेवः ॥ ततः कामाश्रमे रम्ये कानने
मुनिसंकुले उषित्वा रजनीमेकां प्रभाते प्रस्थिताः शनैः सिद्धाश्रमं गताः सर्वे सिद्धचा
रणसेवितम् विश्वामित्रेण संदिष्टा मुनयस्तन्निवासिनः पूजां च महतीं चक्रू रामलक्ष्म
णयोर्द्रुतम् श्रीरामः कौशिकं प्राह मुने दीक्षां प्रविश्यताम् दर्शयस्व महाभाग कृतस्ते

रा.
सं.
१२
12

रामलक्ष्मणौ ततो नृपेमन्त्रैकेश्च निर्ययौ कुमारे भेमुनिभिः सह मध्याह्ने सरयूतीरे तौ रामलक्ष्मणौ कामं
द्रुपितां मारीचस्य सुबाहुस्य वर्षे तो तपिताहिनी रामोपि धनुरायाय द्वौ बाणौ संपूर्ण्य ध- र
श्चाकर्णौ तौ समाकृष्याविसर्जन तयोः पृथक् ततो रक्षे च मारीचं धामयथास्ततो यज्ञनम्
पातयामास जलधौ तद्दुष्करमिवाभवत् द्वितीयोग्निमयो बाणः सुबाहुमनेहन्त्रणात्
श्चपरे लक्ष्मणेनास्त्रदत्तास्तेरेवयायिनः पुष्पवृष्टिं गताकिरन्देवा राघवे सहलक्ष्मणम् दे
वादुंदुभयो नेदुस्तुष्टुवुः सिद्धचारणाः विश्वामित्रस्तमेशस्वयशसादौ रघुनंदनौ प्रेके
निवेश्य चालिंग्य भक्तयावाष्पाकुलेक्षणः भोजयित्वा सहभ्राता रामं पक्वफलादिभिः
पुराणवाक्यैर्मधुरैर्निनाय दिवसत्रयम् चतुर्थेहनि संप्राप्ते कौशिको राममब्रवीत्
रामराममहाबाहो गच्छाम सहवयम् विदेहराजनगरे जनकस्य महात्मनः तत्रमा
हेश्वरं चापमस्ति न्यस्तं पिनाकिना द्रक्ष्यसि त्वं महासत्वे शस्य से मनवे कनच इत्युक्त्वामुनि
भिस्ताभ्यां ययौ गंगासमीपगम् गौतमस्याश्रमं पुण्यं यत्राहल्यास्थिता स्वयम् दि रामः
व्यपुष्पफलोपेतैः पादपैः परिवेष्टितम् मृगपक्षिगणैर्हीनं नानापादपवर्जितम् हे १२

प्रोवाच मुनिश्रेष्ठं रामो राजीवलोचनः कस्यैतदाश्रमं भाति वने भास्वन्महाश्रमं महत्
पशुपक्षिफलैर्युक्तं जंतुभिः परिवर्जितम् आह्लादयति चेतो मे भगवन्ब्रूहि तत्त्वतः ॥
विश्वामित्रः ॥ शृणु राम पुरा वृत्तं गौतमो लोकविश्रुतः सर्वधर्मभृतां श्रेष्ठः तपसारा
धयन्हरिम् तस्मै ब्रह्माददौ कन्यामहल्यां लोकसुंदरीम् ब्रह्मचर्येण संतुष्टः शुश्रूष
णपरायणाम् तया सार्धमिहैवासीद्गौतमस्तपतां वरः शक्रस्तु तां धर्षयितुमंतरं प्रे
प्सुरन्वहं कदाचिन्मुनिवेषेण निर्गते गौतमे गृहात् तां धर्षयित्वा निरगात्त्वरितो मुनि
रण्यगात् दृष्ट्वा यांतं स्वरूपेण मुनिः परमकोपनः पप्रच्छ कस्त्वं दुष्टात्मन्मम रूपधरो
ऽधम सत्यं ब्रूहि न चेद्भस्मीकरिष्यामि न संशयः सोऽब्रवीद्देवराजोऽहं पाहि मां कामकिं
करं कृतं जुगुप्सितं कर्म मया कलुषितचेतसा गौतमः क्रोधताम्राक्षः शशाप दिविजा
धिपं योनिलंपट दुष्टात्मन्सहस्रभगवान्भव शप्त्वा तं देवराजानं प्रविश्य स्वाश्रमं द्रुतम्
दृष्ट्वाहल्यां वेपमानां प्रांजलिं गौतमोऽब्रवीत् दुष्टे त्वं तिष्ठ दुर्वृत्ते शिलायामाश्रमे मम
निराहारा दिवारात्रं तपः परममास्थिता आतपानिलवर्षादिसहिष्णुः परमेश्वरम् ध्या

रा॰ एतां राममेकाग्रमानसा हृदि संस्थितम् नानाजन्तुविहीनोयमाश्रमो मे भविष्यति प-
अ॰ ञ्चवर्षसहस्रेषु वनेऽस्मिन्नेव च रामो दाशरथिः श्रीमानागमिष्यति सानुजः यदा त-
१६ दाश्रमशिलापादन्यासाक्रमिष्यति तदैव धूतपापा त्वं रामं संपूज्य भक्तितः परिक्रम्य
नमस्कृत्वा शापाद्विमोक्ष्यसि पूर्ववन्मम शुश्रूषां करिष्यसि यथासुखम् इत्यु-
13 क्त्वा गौतमः प्रागाद्धिमवन्तं नगेश्वरम् तदाप्रभृत्यहल्या भूतानामदृश्या स्वाश्रमे शुभे तव
पादरजःस्पर्शकाङ्क्षिणी पावनाशनम् आस्ते यापि रघुश्रेष्ठ तपो दुष्करमास्थिता पा-
वनं कुरु मुने भार्यामहल्यां ब्रह्मणः सुताम् इत्युक्त्वा कौशिकः स्नेहाद्दाशरथिं तेन गावः
दर्शयामास चाहल्यामग्रे तपसि संस्थिताम् शिलां रामपदस्पर्शात्तां च पश्य च तपो-
धनाम् नमामि राघवोहल्यां रामोहमिति चाब्रवीत् ततो दृष्ट्वा रघुश्रेष्ठं पीतकौशेय-
वाससम् धनुर्बाणधरं रामं लक्ष्मणेन समन्वितम् स्मितवक्त्रं पद्मनेत्रं श्रीवत्साङ्कितव-
क्षसम् नीलमाणिक्यसंकाशं द्योतयन्तं दिशो दश दृष्ट्वा रामं रमानाथं हर्षविस्फा- राम
रितेक्षणा गौतमस्य वचः स्मृत्वा ज्ञात्वा नारायणं परम् संपूज्य विधिवद्रामं मत्स्या। १६

13A

हिमिभिरनिंदिता हर्षोत्फुल्लजलनेत्राःसा दृष्ट्वात्वाम्प्रणिपत्यसा उत्थायचवन्हृष्टात्मसेया

नीवलोचनम् पुलकांकितसर्वांगागिरागद्गदयेडयत ॥ अहल्या ॥ अहोकृतार्था

स्मिजगन्निवासतेपादाब्जमलग्नरजःकणानहम् स्पृशामियत्पद्मजशंकरादिभिर्वि

मृश्यतेरंजितमानसैःसदा अहोविचित्रंतववासचेष्टितंमनुष्यभावेनविमोहयंजग

त् चलस्यजस्रंचरणादिवर्जितः संपूर्णआनंदमयोतिमायिकः यत्पादपंकज

परागपवित्रगात्रा भागीरथीभवविरिंचिमुखान्पुनाति साक्षात्सएवममदृष्टिप

थोयमास्ते किंवर्ण्यतेममपुराकृतभागधेयम् मर्त्यावतारेमनुजाकृतिंहरिंरामाभि

धेयंरमणीयदेहिनम् धनुर्धरंपद्मविशाललोचनंभजामिनित्यंनपरान्भजिष्ये य

त्पादपंकजरजःश्रुतिभिर्विमृग्यं यन्नाभिपंकजभवःकमलासनश्च यन्नामसाररसि

कोभगवान्पुरारिस्तंरामचंद्रमनिशंहृदिभावयामि यस्यावतारचरितानिविरिंचि

लोकेगायंतिनारदमुखाभवपद्मजाद्याः आनंदजाश्रुपरिषिक्तकुचाग्रसीमावागी

श्वरीवतमहंशरणंप्रपद्ये सोयंपरात्मापुरुषःपुराणएषःस्वयंज्योतिरनंतआद्यः

रा॰ स्तो॰ १५

14

मायातनुंलोकविमोहनीयांधत्तेपरानुग्रहएषरामः अयंहिविश्वोद्भवसंयमानामेकः
स्वमायागुणबिंबितोयः विरिंचिविष्ण्वीश्वरनामभेदान्धत्तेस्वतंत्रःपरिपूर्णआत्मा नमो
ऽस्तुतेरामतवांघ्रिपंकजंश्रियाधृतंवक्षसिलालितंप्रियेः आक्रांतमेकेनजगत्त्रयंपुराध्ये
यंमुनींद्रैरभिमानवर्जितैः जगतामादिभूतस्त्वंजगत्त्वंजगदाश्रयः सर्वभूतेष्वसंसक्तए
कोभातिभवान्परः ॐकारवाच्यस्त्वंरामवाचामविषयःपुमान् वाच्यवाचकभेदेनभवा
नेवजगन्मयः कार्यकारणकर्तृत्वफलसाधनभेदतः एकोविभासिरामत्वंमाययाब
हुरूपया त्वन्मायामोहितधियस्त्वांनजानंतितत्त्वतः मानुषंत्वाभिमन्यंतेमायिनंपरमे
श्वरम् आकाशवत्त्वंसर्वत्रबहिरंतर्गतोमलः असंगोह्यचलोनित्यःशुद्धोबुद्धःसदव्ययः
योषिन्मूढाहमज्ञातेतत्त्वंजानेकथंविभोः तस्मात्तेशतशोरामनमस्कुर्यामनन्यधीः दे
वमेयत्रकुत्रापिस्थितायाअपिसर्वदा त्वत्पादकमलेसक्ताभक्तिरेवसदास्तुमे नमस्तेपु
रुषाध्यक्षनमस्तेभक्तवत्सल नमस्तेस्तुहृषीकेशनारायणनमोस्तुते भवभयहरमेकं
भानुकोटिप्रकाशं करधृतशरचापंकालमेघावभासम् कनकरुचिरवस्त्रंरत्नवत्कुं १५

14A

लाक्षं कमलविपत्रनेत्रमाजानुजंगामसीरे ह्यलैवेगुरूपेसाताराघवेपुरतः स्थितम् परि
क्रम्य प्रणम्याथ रामेणानुज्ञाता ययौ पतिं अहल्याकृतं स्तोत्रं यः पठेद्भक्तिसंयुतः समुच्यते
ऽखिलैः पापैः परंब्रह्माधिगच्छति पुत्राद्यर्थी पठेद्भक्त्या रामं हृदि निधाय च संवत्सरेण लभ
ते वन्ध्यापि पुत्रकम् सर्वान्कामानवाप्नोति रामचंद्रप्रसादतः ब्रह्मघ्नो गुरुतल्पगोपि
पुरुषस्तेयी सुरापोपि वा मातृभ्रातृविहिंसकोपि सततं भोगैकबद्धातुरः नित्यं स्तोत्रमिदं
जपन् रघुपतिं भक्त्या हृदान्तः स्मरन् ध्यायन्मुक्तिमुपैति किंपुनरसौ स्वाचारयुक्तो नरः ॥
इति श्रीमदध्यात्मरामायणे पंचमोध्यायः ५ महादेवः ॥ विश्वामित्रोथ तं गृह्य राघ
वं सहलक्ष्मणम् गच्छामो वत्स मिथिलां जनकेनाभिपालिताम् दृष्ट्वा क्रतुवरं पश्चादयो
ध्यां गंतुमर्हसि इत्युक्त्वा प्रययौ गंगामुत्तीर्य सहराघवः विदेहस्य पुरं प्राप्य ऋषिवाटं समा
विशत् प्राप्तं कौशिकमाकर्ण्य जनकोतिमुदान्वितः पूजाद्रव्याणि संगृह्य सोपाध्यायः
समाययौ दंडवत्प्रणिपत्याथ पूजयामास कौशिकं पप्रच्छ राघवौ दृष्ट्वा सर्वलक्षणल
क्षितौ द्योतयंतौ दिशः सर्वा चंद्रसूर्याविवापरौ कस्यैतौ नरशार्दूलौ सुतौ देवसमोपमौ

रा. मनःप्रीतिकरौ मे घनरवनारायणाविव प्रत्युवाच महर्षिः प्रीतो हर्षेण जनकेन तथा प्रत्यौ
शु. दाशरथस्यैतौ भ्रातरौ रामलक्ष्मणौ मखसंरक्षणार्थाय गमनपानीतौ पितुः पुरात् श्रुत्वा
१५ छुद्राबवो मारीताटकाविश्वबानिनीय प्राणेकेनहतवाञ्ज्ञोदितोमिलविक्रमः ततो
15 ममाश्रमे गता ममयज्ञविहिंसकान् लब्धाञ्जूम्पमहत्वोद्धत्तामारेचेमागारेदिपन् ततो
गंगातटे गुल्मे गौतमस्याश्रमे शुभे दृष्ट्वाहल्यानमस्कृत्य तपासमक्रप्रसृजितः पा
दोद्धुनरजःस्पर्शात्सापि शापाद्विमोचिता दृष्टान्तीद्युकामस्ते राहेमा हेम्बंधनुः श्रु
जितेराजभिः सर्वैर्हृषमित्यनुमुश्रवे श्रुतो हर्षीय राजेन्द्र शैवं चापमनुत्तमम् दृष्ट्वाया
ध्यांजिरामिदृपितं रहृष्टुमिच्छति इत्युक्तो मुनिना राजा ऽसृजेहविकलिश्मजपा पूजयामा
सपमेतो विधिदृष्टेन कर्मणा ततः संप्रेषयामास समंत्रिणो नुद्विमन्तराम् शीघ्रमानय
विभेशचापं रामस्य दर्शाय ततो गते समंत्रिवरे राजा कौशिकमब्रवीत् यदि रामो धनु
र्वेभके कोसा मरोपयेद्गुणम् ततः स्वकान्मन्ना सीतां राघवाय ददाम्यहं तथेति कौशि
कोप्याह मनरामं वीक्ष्य संस्मितम् शीघ्रं दर्शय चापाश्च रामायामिततेजसे पर्वसुनी १५

शाङ्खवीणाश्च गायनाः शापवाहकाः चेराशानसमाप्तके मणिवस्त्रविभूषिते दर्शयामास
रामाय मंजीमेववलोकर इक्षुगामेत्र सुप्राल्यावद्यापरिकरेहरुद्धम् गरुडीत्वावामहस्तेन
लीलयातोलयद्धनुः प्रारोपयामास गुणं प्रपूयत्सखिलराजसु शेषादाकर्षयामास
पाणिनाहरितोनमः व भंजमखिलं हुत्वा तो दिशाः पाहैनशबंधन् दिशश्च विदिशश्चैव स्व
र्गं मर्त्यं रसातलम् तदद्भुतमभूद्देवानां दिविपश्यतां साक्षाद्देवाः कुसुमैर्देवाः स्तु
तिभिरीडिरे देवदुंदुभयो नेदुर्ननृतुश्चाप्सरोगणाः द्विधाभग्नं धनुर्दृष्ट्वा राजानो लिंगय रघू
द्वहम् विस्मयं लेभिरे सीता मातृशोतः पुराजिरे सीता स्वर्णमयीं मालां गृहीत्वा दक्षिण
करे स्मितवक्त्रा स्वर्णवर्णा सर्वाभरणभूषिता मुक्ताहारैः कर्णपत्रैः क्वणत्कांचननूपु
रा दुकूलपरिसंवीता वस्त्रान्तर्व्यंजितस्तनी रामस्योपरि निक्षिप्य स्मयमाना मुदं ययौ
ततो मुमुदिरे सर्वे राजदाराः स्वलंकृताः गवाक्षजालरंध्रेभ्यो दृष्ट्वा लोकविमोहनम् त
तो ब्रवीन्निरजा पत्रं प्रेषयमनन्तरम् राजा दशरथः शीघ्रमागच्छतु सपुत्रकः विवाहा
र्थं कुमाराणां सदारः सहमंत्रिभिः तथेति प्रेषयामास दूतांस्त्वरितविक्रमान् ते गत्वा

रा० मं० २६
16

राजशार्दूले रामश्रेयो न्यवेदयत् श्रुत्वा रामस्कृते राजा हर्षेण महतान्वितः मिथिलां गा

मनायथापालनाया मास नमंत्रिणः गच्छंत मिथिलां सर्वे राजानश्च रथपत्तयः रथमानीय म

शीघ्रं गच्छामा येवमाचिरम् वसिष्ठकश्यपो याता सदारः सहितोग्निभिः रामस्मातरमाइ

धनुर्भंगे महाभागा न्यगुः एवं प्रस्थाप्य सकलं राजा निर्वि विपुले रथम् महत्या सेनया सार्धं

मारुतप्लवितोपयौ आगतं राघवं श्रुत्वा राजा हर्षसमाकुलः प्रत्युज्जगाम जनकः ।

शतानंदपुरोगमः यथोक्तेन पूजयामास सत्कृतम् रामः स लक्ष्मणो

मुदवंदे चरणौ पितुः ततो हृष्टो दशरथो रामं वचनमब्रवीत् दिष्ट्या पश्यामि ते राम

मुखं फुल्लाब्जलोचनम् मुनेस्तु प्रसादात्सर्वे संपन्नं मम शोभनम् इत्युक्त्वाथ पुत्रं मूर्ध्नि

मालिंग्य च पुनः पुनः हर्षेण महताविष्टो बभूवानंदसागरः ततो जनकराजेन मंदिरे

संनिवेशितः शोभने सर्वशोभाढ्ये सदारः सुस्थितः सुखं ततः शुभे दिने लग्ने सुहूर्ते स

महोत्सवम् आनयामास धर्मात्मा समानूपितरजनकः रत्नस्तंभैर्वितानैश्च हरितालैर्म

तोरणैः मंडपे सर्वशोभाढ्ये मुक्तापुष्पफलान्विते वेदविद्भिः सविप्राभिर्ब्राह्मणैः सह

राम २६

भूषितैः सकामिनीभिः परिवेतो निष्कंकंठोभिराजते श्रीरीहेहेमिनिर्घोषे गीतनृत्यसमाकु
ले दिव्यरत्नाचिते स्वर्णपीठे रामं न्यवेशयत् वसिष्ठः कौशिकश्चैव शतानंदः पुरोहिताः
पुण्याहं मंत्रं जपित्वा रामस्योभयपार्श्वतः स्थापयित्वा समिद्धाग्निं ज्वालयित्वा यथाविधि
सीतामानीय शोभाढ्यां नानारत्नविभूषितां सभायां जनकः प्राचेशामेराजीवलोचनम् पारोत्
श्रुत्यामाविधिवन्न्यदेपाम्प्रधारयत् याधन्ता मूर्ध्नि शर्वे प्रश्नलक्षणा मुनिभिः सह ततः सी
ताकरे धृत्वा साहितोदकपूर्वकम् रामायप्रददौ श्रीमान्पाणिग्रहविधानतः सीताकमल
पत्राक्षी स्वर्णमुक्ताविभूषिता दीयते मेसुता तुभ्यं प्रीता भव रघूद्वह इति प्रीतेन मनसा सी
तां रामकरेऽर्पयत् मुमोद जनकोलक्ष्मीं क्षीराब्धिरिवाच्युते ऊर्मिलां चौरसीं कन्यां ल
क्ष्मणाय ददौ तदा तथैव श्रुतकीर्तिं च माण्डवीं भ्रातृकन्यके भरताय ददौ चैकां शत्रुघ्ना
यापरां तथा चत्वारो दारसंपन्ना भ्रातरः शुभलक्षणाः विरेजुः प्रभया सर्वे लोकपाला इ
वापरे ततो ब्रवीद्धर्षिस्वा पुरिश्वामित्रोपि सार्थवलः जनकः स्वमतो दातेनारुहेनाभिमा
विताम् दत्तभूमिविभूत्यर्थेकृष्यतेलाङ्गलेन मे सीतामानस्पसंपन्नाकन्यकाशुभल

रा० ह्मणा नाम्नस्ते महाश्रीमान्पुत्रिकाभवभाविता सुप्रीता प्रियभार्यायै शारस्वेऽस्मानना
सु० एकदा नारदोऽभ्यागाद्धि विकुण्ठे सत्यसंस्थिते गायन्नद्वरनीवीणां गायन्नारायणं विभुम् श्रु
१२ जितः सत्यमासीनो मामुवाच सुरोत्तमः श्रुणुष्व वचने गुह्यं तवाभ्युदयकारणम् प
17 रमात्मा हृषीकेशो भक्तानुग्रहकाम्यया देवकार्यार्थसिद्ध्यर्थं रावणस्य वधाय च जातो
रामः इति ख्यातो मायामानुषवेशधृक् आस्ते दाशरथिर्भूत्वा चतुर्धा परमेश्वरः योगमा
यापि सीतेति जाता वै जनकवेश्मनि अनन्तस्तत्र रावायै देहि सीतां प्रयच्छतः नारम्भ्यः सर्व
भार्यैषा मम परमात्मनः इत्युक्त्वा प्रययौ देवगतिं देवमुनिस्तदा तदाप्रभृति मया सीता
ऽपि सोल्लक्ष्मीर्विभाव्यते कथं मया राघवाय जानकी दीयते शुभा इति चिन्तासमाविष्टः
कार्यमेतद्विचिन्तयम् सीतायामहसो हेतुर्न्यासभूतमिदं धनुः ईश्वरेण पुरा दत्तं पुरदाह
दनेऽतरम् धनुरेतर्पणं कार्यमिति निश्चित्य तत्क्षणात् सीतापाणिग्रहार्थाय सर्वेषां मा
नवानाम् त्वत्प्रसादान्मुनिश्रेष्ठ रामो राजीवलोचनः आगतो धनुषं द्रष्टुं फलितो मे म राम
नोरथः अद्य मे सफलं जन्म राम त्वां सह सीतया एकासनस्थं पश्यामि भ्राजमानं रवि १२

17A

यथा त्वमादौ प्रभवो ब्रह्मा सृष्टिचक्रप्रवर्तकः बलिस्त्वमाद्य सलिले धृत्वा भूमिं हिताधि-
पः त्वमादर्पोऽस्ते सत्यमध्ये शौटहत्या भुवः प्रापतः सदा पवित्रो निर्मलः कारुण्यस्त्वमोऽधिकः
स्थितो यस्मादपकल्पनयाननमनराजा योगेन्द्रैर्जितं भवभयं जितकालचक्रः यत्रामको-
तेनपदाजितः स्वर्गोकालेवास्त्वमेव शरणं मतं तत्पदे इति त्वमानस्य शरदाचव-
यमहात्मने दासादीनां कोटिशतं यथा नामश्रुतं तथा यत्नो नोचलत्यमेकं दासीनां वि-
शतं ददौ दिव्याभरणानि हारांश्च मुक्तावलीमयोज्ज्वलान् सीतायै जनकः प्रादात् त्रीन्याउ
हितवत्सलः ऊर्मिलादीन् समं सत्यभर्तलक्ष्मणं यथा सीतामालिङ्ग्य हृदये मातरः
साश्रुलोचनाः एवं सुवर्णपदानि नित्यं रामं समनुव्रता पातिव्रत्यं सदा पालयन्ति एव
त्सयथा सलिलम् प्रयाणकाले भुवनेश्वरस्य भीरीभूरणानकतूर्यघोषः स्वर्गापि भीरीश्वन
तूर्यशङ्खः संस्थितो भूतभयंकरो ऽभूत् ॥ रामायणे षष्ठोऽध्यायः ॥ महादेवः ॥ अथ रा-
ज्ञि तिष्ठतो नाम मैथिला योजनत्रयम् निमिनाम्ना निचोराणि दर्शनेऽपि समः स्वनावास
एवमद्य किमिदं स्वनिवेशराव निमिनाम्नी हृष्यते विपरीतानि सर्वशः वशिष्ठस्तमयोध्या

रा.
सवा.
१८
18

दभयमागामिष्यते पुनरप्यस्य तेऽपशीघ्रमेव भविष्यति मुनाः प्रदक्षिणीकृत्य तांपश्य
सभस्तवकाः इत्येवं वदतस्तस्य वसिष्ठस्य रत्नरोऽनिलः समुत्थश्चद्वाष्पसवैबापाश्वत्रुद्दिश्चिंध
यत्र शूरः पश्यततस्तोदेवो जामदग्न्यः प्रतापवान् नीलमेघनिभः प्रांशुर्जटामंडलमंडितः
धनुःपरशुपाणिश्च साक्षात्कालइवांतकः कार्तवीर्यांतको रामो दृप्तक्षत्रियमर्दनः प्रा
प्तोदशरथस्याग्रे कालमृत्युरिवापरः तेदृष्ट्वाभयसंत्रस्तो राजा दशरथस्तदा अर्घ्यादिपू
जां विस्मृत्य त्राहि त्राहीति चाब्रवीत् दंडवत्प्रणिपत्याह पुत्रप्राणान् प्रयच्छ मे इति ब्रुवंतं
राजानमनादृत्य रघूत्तमम् उवाच निष्ठुरं वाक्यं क्रोधात्प्रचलितेंद्रियः त्वं राम इति नाम्ना
मे चरसि क्षत्रियाधम द्वंद्वयुद्धं प्रयच्छाशु यदि त्वं क्षत्रियोऽसि मे पुराणं जर्जरं चापं भंक्त्वा त्वं
कत्थसे मुधा इदं तु वैष्णवं चापमारोपयसि चेद्गुणम् तदा युद्धं त्वया सार्धं करोमि रघुवंश
ज नचेत्सर्वान् हनिष्यामि क्षत्रियांतकरो ह्यहम् इति ब्रुवति वै तस्मिंश्चचाल वसुधा भृ
शम् अंधकारो बभूवाथ सर्वेषामेव चक्षुषां रामो दाशरथिर्वीरो वीक्ष्य तं भार्गवं रुषा एम
धनुराच्छिद्य तद्धस्तादारोप्य गुणमंजसा तूणीराद्बाणमादाय संधायाकृष्य वीर्यवान् १८

उवाच भार्गवं रामः श्रुणो ब्रह्मन्वचो मम लक्ष्यं दर्शय बाणस्य ह्यमोघो ऽयं मम सायकः लोका
न्वा तव गतिं वापि वद शीघ्रं मम त्वया एवं वदति श्रीरामे भार्गवो विक्रमान्वितः संस्मरन्
वैष्णवं तेजमिदं वचनमब्रवीत् ॥ परशुरामः ॥ राम राम महाबाहो ज्ञानेनापदेवमश्वरम्
पुराणं पुरुषं विष्णुं जगतां कर्तारमव्ययम् बालोऽहं तपसा विष्णुमाराधयितुमञ्जसा च
क्रतीर्थं भेगत्वा तपसा विष्णुमव्ययं प्रतोषयं महात्मानं नारायणमनन्यधीः ततः प्र
सन्नो देवेशः शंखचक्रगदाधरः उवाच मां प्रसन्नात्मा सुप्रसन्नमुखपंकजः ॥ श्रीभगवान् ॥
उत्तिष्ठ तपसो वत्स फलितं तेन ते तपो महत् मच्चिदंशेन युक्तस्त्वं जहि हैहयपुंगवम् का
र्तवीर्यं पितृहन्तारं यदर्थं ते तपःश्रमः ततस्त्रिःसप्तकृत्वस्त्वं हत्वा क्षत्रियमण्डलम् कृत्स्नां
भूमिं कश्यपाय दत्त्वा शान्तिमुपावह त्रेतायुगे दाशरथिर्भूत्वाहं परमव्ययः उत्पत्स्ये प
रया भक्त्या तत्र द्रक्ष्यसि मां पुनः मत्तेजः पुनरादास्ये त्वयि दत्तं मया पुरा तदा तपश्चर
लोके तिष्ठ त्वं ब्रह्मणो दिनम् इत्युक्त्वान्तर्दधे देवस्तथा सर्वं कृतं मया स एव विष्णुस्त्वं राम
ज्ञातोऽसि ब्रह्मणार्थितः मयि स्थितं तत्तेजस्त्वयैव पुनराहृतम् अद्य मे सफलं जन्म

रा॰ अर॰ १५ 19

प्रतीतोसिममाग्रतो ब्रह्मादिभिरलभ्यस्त्वं प्रकृतेः पारगो मतः त्वयि जन्मादिषड्भावा न
संत्यज्ञानसंभवाः निर्विकारोसि निर्द्वंद्वो गमनादिविवर्जितः यथा फेनो जले त्वाला
वृद्धौ मायया न च्यात्वाऽपि ज्ञानदप्युपशास्त्रसूर्यशाखिनीव प्रमत्तला स्वं देहमायाहि मे शोनस्त
स्थिरे वा तयानात्वापि त्वदाधारा त्वद्विषया माया कार्यं सृजत्यसौ यावन्मायावृता लोकास्ता
वत्त्वां न विजानते अविद्याविनसिंदृषा विद्याविद्यादिरूपिणी अविद्याकृतदेहादिसंघा
ते प्रतिबिंबिता चिच्छक्तिर्जीवलोकेस्मिंजीव इत्यभिधीयते यावद्देहादिकप्राणबुद्ध्या
ष्वभिमानवान् तावत्कर्तृत्वभोक्तृत्वसुखदुःखादिभाग्भवेत् आत्मनः संसृतिर्नास्ति
बुद्धेर्ज्ञानं न जात्विति अविवेकात्तदुभयं संसारेति प्रवर्तते जडस्याचित्समायोगाच्चि
त्त्वं भूयाच्चितेस्तथा जडसंगाज्जडत्वं हि जलाग्न्योर्मेलनं यथा यावत्त्वत्पादभक्तानां संग
सौख्यं न विंदति तावत्संसारदुःखौघान्न निवर्तेन्नरः सदा सत्संगलब्धया भक्त्या यदा त्वां
समुपासते तदा माया शनैर्याति तानवं प्रतिपद्यते ततः त्वज्ज्ञानसंपन्नः सद्गुरुस्तेन ल
भ्यते वाक्यज्ञानं गुरोर्लब्ध्वा त्वत्प्रसादाद्विमुच्यते तस्मात्त्वद्भक्तिहीनानां कल्पकोटिशतैर रा॰ १५

19A

पि नमस्ते शंकाविज्ञानशंकानैव सन्ति नथा श्रुतस्त्वत्पादयुगले भक्तिर्जन्मनि जन्मनि
स्यात्त्वद्भक्तिमतां संसारो विद्यायां भक्तिर्विनश्यति लोके त्वद्भक्तिनिरतास्त्वद्धर्मामृतवर्षिणः
पुनन्ति लोकमखिलं किं पुनः स्वकुलोद्भवम् नमोस्तु जगतां नाथ नमस्ते भक्तिभावन
नमः कारुणिकानंद रामचंद्र नमोस्तु ते देव यद्यत्कृतं पुण्यं मया लोकजिगीषया त
त्सर्वं तव बाणाय भूयाद्राम नमोस्तु ते ततः प्रसन्नो भगवान् श्रीरामः करुणामयः उवा
च प्रहसन्धीतो जामदग्न्यं महाबलम् प्रसन्नोस्मि तव ब्रह्मन्यत्ते मनसि वर्तते दास्ये तद
खिलं कामं मा कुरुष्वात्र संशयम् ततः प्रीतेन मनसा भार्गवो राममब्रवीत् यदि मेनुग्र
हो राम तवास्ति मधुसूदन त्वद्भक्तसंगस्त्वत्पादे भक्तिः सदास्तु वै स्तोत्रमेतत्पठे
द्यस्तु भक्तिहीनोपि सर्वदा त्वद्भक्तिस्तस्य विज्ञानं भूयादंते स्मृतिस्तव तथेति राघवेनो
क्तः परिक्रम्य प्रणम्य तम् पूजितस्तेन जगाम महेंद्राचलमभ्यगात् राजा दशरथो हृ
ष्टो राममृतमिवागतम् आलिंग्यालिंग्य हर्षेण नेत्राभ्यां जलमुत्सृजन् ततः प्रीतेन म
नसा स्वस्थचित्तपुरीययौ रामलक्ष्मणशत्रुघ्नभरता देवसंमताः स्वां स्वां भार्यामुपादाय

रा.
अ.रा.
२.
२०

रेमिरे स्वस्वमंदिरे मातापितृभ्यां संहृष्टो रामः सीतासमन्वितः रेमे वैकुंठभवने श्रि
या सह यथा हरिः युधाजिन्नाम कैकेय्या भ्राता भरतमातुलः भरतं नेतुमागच्छत्
स्वराज्यं प्रीतिसंयुतः प्रेषयामास भरतं राजा स्नेहसमन्वितः शत्रुघ्नं चापि सस्ने
युधाजिनमरिंदमः कौसल्या सुसुभे देवी रामेण सह सीतया देवमातेव पौलो
म्या शचीपुत्रा शक्रेण शोभिता गेहे स्वे स्वप्रथितगुणगणो लोकसंगीतकीर्तिः श्री
रामः सीतयास्ते निखिलजननिकरानंदसंदोहमूर्तिः नित्यश्रीर्निर्विकारो निरवधि
विभवो नित्यमायानिवासो मायाकार्यानुसारी मनुज इव सदा भाति देवोखिलेशः
इति श्रीरामायणे बालकांडे सप्तमोध्यायः ॥ अतः परमयोध्याकांडं भावि
ष्यति ॥ शुभम् ॥

बालकांडः पत्रिः २०

२.

वदध्रुवंच स्वप्नोपमेह्यस्मिन्सर्वमायुरल्पंतथापिजंतोरभिमानपूर्वः संसृतिः स्वप्न
सदृशीसदारोगादिसंकुला गंधर्वनगरप्रख्यांमूढस्तामनुवर्तते आयुःसंक्षीयते
यस्मादादित्यस्यगतागतैः दृष्ट्वान्येषांजरामृत्यूकथंचिन्नैवबुध्यते सएवदिवसः
सैवरात्रिरित्येवमूढधीः भोगाननुपतत्येवकालवेगंनपश्यति प्रत्यहंक्षीयतेवय
त्येवमायुरामघटांबुवत् सपत्ना इवरोगौघाः शरीरंप्रहरंत्यहो जराव्याघ्रीवपुर
तस्तर्जयंत्यवतिष्ठते मृत्युःसहैवयात्येषसमयंसंप्रतीक्षते देहेहंभावमापन्नो
राजाहंलोकविश्रुतः इत्यस्मिन्मनुतेजंतुर्कृमिविड्भस्मसंज्ञिते त्वगस्थिमांसवि
एमूत्ररेतोरक्तादिसंयुते विकारीपरिणामीचदेहआत्माकथंवद यमास्थायभवां
लोकान्द्रष्टुमिच्छसिलक्ष्मण देहाभिमानिनःसर्वेदोषाःप्रादुर्भवंतिहि देहोयमि
तियाबुद्धिरविद्यासाप्रकीर्तिता नाहंदेहश्चिदात्मेतिबुद्धिर्विद्येतिभण्यते अविद्या
संसृतेर्हेतुर्विद्यातस्यानिवर्तिका तस्माद्यत्नःसदाकार्यो विद्याभ्यासेमुमुक्षुणा ।
कामक्रोधादयस्तत्रशत्रवः शत्रुसूदन तत्रापिक्रोधएवालंमोहायबंधायसर्वथा ।

Extra page.

अ
रा
यो ५

येनाविष्टः पुमान्हन्ति पितॄन्भ्रातॄन्सुहृत्सखीन् क्रोधमूलमनस्तापः क्रोधः संसारबंध
नम् धर्मक्षयकरः क्रोधस्तस्मात्क्रोधं परित्यज क्रोध एष महाशत्रुस्तृष्णा वैतरणी
नदी संतोषो नंदनवनं शान्तिरेव हि कामधुक् तस्माच्छान्तिं भजस्वाद्य शत्रुरेवं भवे
न्न ते देहेन्द्रियप्राणमनोबुद्ध्यादिभ्यो विलक्षणः आत्मा शुद्धः स्वयंज्योतिरविकारो नि
राकृतिः यावद्देहेन्द्रियप्राणैर्भिन्नत्वं नात्मनो विदुः तावत्संसारदुःखौघैः पीड्यन्ते मृ
त्युसंयुताः तस्मात्त्वं सर्वदा भिन्नमात्मानं हृदि भावय बुद्ध्यादिभ्यो बहिः सर्वमनुवर्त
स्व मा खिद भुंजन्प्रारब्धमखिलं सुखं वा दुःखमेव वा प्रवाहपतितं कार्यं कुर्वन्नपि न लि
प्यसे बाह्ये सर्वत्र कर्तृत्वमावहन्नपि राघव अंतः शुद्धस्वभावस्त्वं लिप्यसे न च कर्मभिः
एतन्मयोदितं कृत्स्नं हृदि भावय सर्वदा संसारदुःखैरखिलैर्बाध्यसे न कदाचन त्व
मप्येवं मयादिष्टं हृदि भावय नित्यदा समागमं प्रतीक्षस्व न दुःखैः पीड्यसे चिरम् न स
दैकत्र संवासः कर्ममार्गानुवर्तिनाम् यथा प्रवाहपतितप्लवानां सरितां तथा च
तुर्दश समाः संख्या क्षणार्धमिव जायते अनुमन्यस्व मामेवं दुःखं संत्यज्य दूरतः प

राम
॥